६

इह एकं पुस्तकं एका पेटिका च स्तः। तत् कृष्णस्य पुस्तकम्।

तस्य पुस्तकस्य मूल्यम् एको रूप्यकः। अस्मिन् पुस्तके शतं पुटानि

सन्ति। मम पुस्तके दश द्वादश वा पुटानि सन्ति।

अस्यां पेटिकायां कानि वस्तूनि विद्यन्ते?

तस्यां पेटिकायां भूषणानि धनानि च विद्यन्ते।

इयं हरेः पेटिका। स इमां कुञ्चिकया उद्घाटयति।

कुञ्चिका हरेः करे वर्तते।

नक्षत्राणि कदा प्रकाशन्ते? नक्षत्राणि रात्रौ प्रकाशन्ते।

तानि दिवा न प्रकाशन्ते। मेघैः आवृते नभसि रात्रौ च न प्रकाशन्ते।

यदा सूर्यः अस्तम् अयते तदा ताराणि प्रकाशन्ते।

तानि व्योम्नि हीरवत् द्योतन्ते। नक्षत्राणां राजा चन्द्रः।

चन्द्रस्य प्रकाशः चन्द्रिका।

अहं नक्षत्राणि गणयामि। किन्तु तानि गणयितुं न पारयामि।

तानि असङ्ख्यानि वर्तन्ते। तत्र अश्विन्यादीनि सप्तविंशतिः नक्षत्राणि प्रधानानि।